**दिनाङ्क :- 06.11.2025**

**प्रात: - 06:55**

**अथ वार्ता:**

**बिहार-मतदान:**

बिहारस्य प्रथमचरणस्य विधानसभानिर्वाचनार्थं मतदानम् अद्य भविष्यति । अस्मिन् चरणे अष्टादश मण्डलेषु एकविंशत्युत्तर-एकशतम् निर्वाचनक्षेत्रेषु मतदानं भवति। तेषु क्षेत्रेषु पटना, वैशाली, नालंदा, भोजपुर, मुंगेर, सारण, सिवान, बेगूसराय, लखीसराय, गोपालगंज, मुजफ्फरपुर, दरभंगा, मधेपुरा, सहरसा च सन्ति । मतदानं प्रातः सप्त-वादने आरभ्य सायं षड्-वादनपर्यन्तं भविष्यति । परन्तु सुरक्षाकारणात् सिमरी बख्तियारपुर, महिषी, तारापुर, मुंगेर, जमालपुर, तथा सूर्यगढ़ विधानसभा-खण्डानां षट्पञ्चाशत् मतदानकेन्द्रेषु मतदानस्य समाप्तिः सायं पञ्चवादने भविष्यति । स्वतन्त्रं, निष्पक्षं, शान्तिपूर्णं च मतदानं सुनिश्चेतुं विस्तृतसुरक्षाव्यवस्था कृता अस्ति । मतदानप्रक्रियायाः निरीक्षणार्थम् अत्याधुनिकं कमाण्ड् एण्ड् कण्ट्रोल् इति केन्द्रं स्थापितं अस्ति, यत्र सर्वेभ्यः एक-चत्वारिंशदुत्तर-त्रिशताधिक-पञ्चचत्वारिंशत्-सहस्र- मतदानकेन्द्रेभ्यः वेब-कास्टिंग् इति दृश्य-प्रसारणं भवति । राज्य-सशस्त्र-आरक्षिबलेन सहितं केन्द्रीय-सशस्त्र-आरक्षि-बलान्यपि सर्वेषु मतदानकेन्द्रेषु नियोजितानि वर्तन्ते । महिलासशक्तिकरणस्य प्रवर्धनार्थं षड्विंशत्युत्तर-नवशतम् सर्वमहिलाप्रबन्धितानि केन्द्राणि, दिव्याङ्गजन (विशेषतः समर्थाः) कर्मचारिभिः प्रबन्धिताः सप्तोत्तर-एकशतं केन्द्राणि च स्थापितानि सन्ति । तदतिरिक्तं मतदातृणां कृते वर्धितसुविधाभिः सह विंशत्युत्तर-त्रिशतम् आदर्शकेन्द्राणि स्थापितानि सन्ति । पटनानगरस्य मुख्यनिर्वाचन-पदाधिकारिणः कार्यालये विशेषनियन्त्रणकक्षः स्थापितः अस्ति । मतदातारः आरोप-पञ्जीकरणार्थं दूरभाषसङ्ख्या शून्यम्,षट्,एकम्,द्वे-द्वे,अष्ट,द्वे,चत्वारि,शून्यम्,शून्यम्,एकम् (0612-2824001), अथवा ईमेल ceo_bihar@eci.gov.in तथा ceobihar@gmail.com इति च सम्पर्कयितुं शक्नुवन्ति ।

**बिहार-द्वितीय चरण अभियान:**

अपरत्र राज्ये द्वितीयचरणस्य निर्वाचनस्य कृते प्रचारः पूर्णतया प्रचलति । एनडीए अथ महाघटबन्धनस्य ताराप्रचारकाः, वरिष्ठनेतारः च अस्मिन् चरणे निर्वाचन-क्षेत्रेषु, सीमाञ्चल-चम्पारण-मगध-क्षेत्रेषु च निर्वाचन-सभायाः सम्बोधनं कृतवन्तः। पूर्वचम्पारण-पश्चिमचम्पारण-क्षेत्रयोः भाजपा-राष्ट्रीय-अध्यक्षः जे.पी.नड्डा सभायाः सम्बोधनं कृतवान् । यत्र हि, संयुक्त जनता दलस्य अध्यक्षः एवं मुख्यमंत्री नीतीश कुमारः अररिया, कटिहार, किशनगंज क्षेत्रेषु जनसभानां संबोधनं कृतवान् । महाघटबन्धनतः काङ्ग्रेसनेत्री प्रियङ्का गान्धी वाल्मीकिनगरे चनपतिया इत्यत्र च प्रचारं कृतवती ।

**प्रधानमन्त्री- वन्दे मातरम्**

प्रधानमन्त्री श्रीनरेन्द्र मोदी श्वः नवदिल्ल्यां 'वन्दे मातरम्' इति राष्ट्रियगीतस्य सार्धैकशतवर्षाणाम् अवसरे वर्षव्यापी-स्मरण-कार्यक्रमस्य उद्घाटनम् करिष्यति । संस्कृति-मन्त्रालयेन अस्य राष्ट्रगीतस्य सार्धैकशततमस्य स्मरण-कार्यक्रमस्य उद्घाटनसमारोहस्य आयोजनं भविष्यति। अनेन सह श्वः आरभ्य आगामिवर्षस्य नवम्बरमासस्य सप्तम-दिनाङ्कपर्यन्तं आवर्षं राष्ट्रव्यापी-स्मरणस्य औपचारिकप्रारम्भः भविष्यति । उद्घाटनसमारोहस्य प्रमुखविशेषतासु वंदेमातरम इत्यस्य सार्धैकशतवर्षाणाम् इतिहासस्य प्रदर्शनी भविष्यति। लघुवृत्तचित्रस्य प्रदर्शनं, स्मारकमुद्रायाः डाक-मुद्रायाः च विमोचनं च भविष्यति।

**प्रधानमंत्री-अमुल् तथा इफ्फको**

प्रधानमंत्री श्री नरेन्द्र मोदी सहकार-क्षेत्रे वैश्विकक्रमाङ्कने प्रथमद्वितीयपदयोः प्राप्त्यर्थं भारतीय अग्रणी सहकारिणोः अमुल् तथा इफ्फको इत्येतयोः कृते अभिनन्दनं कृतवान् । सामाजिक-सञ्जाल-माध्यमे श्रीमोदी अवदत् यत् भारतस्य सहकारीक्षेत्रं जीवन्तं वर्तते, अनेकेषां जीवनानां परिवर्तनं अपि करोति । तेन प्रोक्तं यत् आगामि-समये अस्य क्षेत्रस्य अधिकं प्रोत्साहनार्थं सर्वकारेण अनेकानि कार्याणि करिष्यते ।

**पुरुषक्रिकेट::**

पुरुषक्रिकेट्-क्रीडायां, भारत-आस्ट्रेलिया-दलयोः मध्ये, पञ्च-क्रीडा-श्रृङ्खलायाः चतुर्थ-विंशतिं-प्रतिविंशति-अन्तर्राष्ट्रीय-द्वन्द्वः अद्य आस्ट्रेलियादेशस्य क्वीन्सलैण्ड्-नगरस्य कैरारा-ओवल-क्रीडांगणे भविष्यति। भारतीयसमयानुसारं अपराह्ने पादोन-द्विवादने इयं क्रीडास्पर्धा आरभ्यते।

**॥ इति वार्ताः॥**